# रामगिरिः (रामगढम्)

छत्तीसगढ़प्रदेशस्य उत्तरस्यां दिशि मुकुटमिव सरगुजामण्डलं स्थितमस्ति। रत्नगर्भः भूभागोऽयं वन्यशोभामपि धारयति। अत्र अनेकानि ऐतिहासिक–पुरातात्विक स्थलानि सन्ति, तेषु अन्यतम :– रामगिरिः (रामगढम्)।



इदं स्थानम् अम्बिकापुरात् पञ्चचत्वारिंशत् कि.मी. दूरे दक्षिणदिशि वर्तते। रामगढपर्वते– हस्तिपोलः (हाथीपोल) सीतावेंगरा, जोगीमाड़ा, लक्ष्मणवेंगरा इत्येतानि महत्वपूर्णस्थानानि सन्ति।

हस्तिपोलेति 180 फुट परिमिता प्राकृतिकसुरङ्गिका अस्ति। अस्य अन्तर्भागे स्रोतः प्रवहति। अत्रैव एकं शीतलं जलकुण्डं वर्तते। यत् सीताकुण्डमिति कथ्यते। अत्र श्रीरामः वनवासकाले किञ्चितकालं न्यवसत्। विश्वकविः कालिदासः अत्रैव निवसन् 'मेघदूतम्' इति काव्यस्य रचनामकरोत्। तेन दूतकाव्ये सीतायाः स्नानेन अत्रत्यजलानि पुण्यानि, तरवः स्निग्धच्छाया इति रामगिरेः वर्णनं कृतम्।

हस्तिपोलसुरङ्गस्योपरि एका नाट्यशाला अस्ति। जनाः यां 'सीतावेंगरा' इति कथयन्ति। पुरातत्वविदः सीतावेंगरा गुहां ख्रीस्ताब्दात् द्वितीया तृतीया वा शताब्दिपूर्वा प्राचीनतमा नाट्यशाला इति मन्यन्ते। इयं नाट्यशाला वृहत्शिलां कर्तयित्वा निर्मिता। अस्याः रूपाङ्कनं भरतमुनिनानाट्यशास्त्रे कृतम्। इयं नाट्यशाला आयताकारा, अनुमानतः आयामः (लम्बाई) 44.00 (फुट) विस्तारः (चौड़ाई) 15 (फुट) इति क्षेत्रे परिमिता। अस्याः भित्तयः सरलाः, द्वारं गोलाकारं, अन्तर्भागे प्रस्तर– आसनानि सन्ति। अस्याः उपयोगः नाट्यस्य कृते अभवत्। ब्राह्मीलिप्यामुत्कीर्णः एकः शिलालेखोऽस्ति। अयं भारतस्य इतिहासे अद्वितीयः अस्ति। अस्याः अनुसन्धानं 1848 ख्रीस्ताब्दे कर्नल आउस्ले इति महाभागेन कृतम्।

सीतावेंगरा गुहायाः पार्श्वे अन्या गुहा 'जोगीमाडा' अस्ति। अस्याः भित्तयः वज्रलेपेन प्रलिप्ताः सन्ति। छदि भित्तिषु च पत्र–पुष्प, पशु–पक्षी, नर–नारी, देव–दानव, योद्धृ,–हस्तिनां चित्राणि सन्ति। एषां भित्तिचित्राणां विशिष्टमहत्वमस्ति। भित्तिचित्राणां प्रकाशनं 1904 ईसवीये डॉ० ब्लाशः भारतीय चित्रकलायाःविज्ञः आर०ए० अग्रवाल महाभागःच अकुरुताम्। अस्यां पालिभाषायां एकः शिलालेखः उत्कीर्णः। शिलालेखेरूपदक्षदेवदीनस्य देवदासीसुतनुकायाः प्रणयगाथा वर्णिता अस्ति।

जोगीमाडा गुहायाः अग्रभागे अपरा लक्ष्मणवेंगरा गुहा अस्ति। पर्वतस्योपरि एकं सिंहद्वारमस्ति। द्वारस्य प्रस्तरः वृहदाकारोऽस्ति। तत्र मूर्तिमन्दिरतडागावशेषाः प्रमाणयन्ति यत् इदं क्षेत्रम् पुरा दुर्गम् आसीत्।

रामगिरिः वनदेव्याः ललितपुरेतिहासस्य संधाता संस्कृतभाषायाश्च स्वर्णिमकालदृष्टा अस्ति। अत्र आषाढमासस्य प्रथमदिवसे छत्तीसगढसंस्कृत–अकादम्याः गरिमामयः सांस्कृतिककार्यक्रमः विचारगोष्ठी च आयोज्यते। आयोजने संस्कृतभाषायाः विद्वांसः इतिहासविदः पुरातत्वविदः जनान् उद्बोधयन्ति। तर्कयन्ति, विचारयन्ति अनन्योऽयं यत् रामगिरिरित्येव।

## शब्दार्थाः

मण्डलम्=जिला। अन्यतमः=बहुत में से एक। वेंगरा=अतिथि कक्ष (सरगुजिया बोली में)। स्रोतः=सोता, झरना। निवसन्=निवास करते हुए। स्निग्धच्छाया=घनी छाया। नाट्यशाला=रंगमंच, नाटक खेलने का घर। ख्रीस्ताब्दात्=ईसवी सन् से। वृहत्शिलाम्=बड़ी चट्टान को। कर्तयित्वा=काटकर। प्रस्तरआसनानि=बैठने के लिये पत्थर के आसन। नाट्यस्य=नृत्य, गीत और वाद्य का। उत्कीर्णम्=खुदा हुआ। अनुसन्धानम्=खोज। पार्श्वे=बगल में। छदि=छत में। वज्रलेपेन=एक प्रकार का मशाला या लेप जो मजबूती के लिए दीवार पर लगाया जाता है। भित्तिषु=दीवारों में। विज्ञः=जानकार। पालिभाषायाम्=पाली भाषा में (इस भाषा का प्रयोग बौद्धसाहित्य एवं अशोक के शिला लेखों में हुआ है।)। जोगीमाडा=जोगियों के रहने की गुफा (सरगुजिहा बोली में)। रूपदक्षदेवदीनस्य=नाटकों में रूप सज्जा का काम करने वाले देवदीन की। अवशेषाः=बचे हुए, शेष। दुर्गम्=गढ। संधाता= धारण करने वाला।

## व्याकरणम्

### सन्धि

भूभागोऽयम्–भूभागः+अयम्–(विसर्ग सन्धि)। इत्येतानि–इति+एतानि–(यण् स्वर सन्धि)। कंचित–कं+चित् –(व्यञ्जन सन्धि)। अत्रैव–अत्र+एव–वृद्धि स्वर सन्धि। पर्वतस्योपरि–पर्वतस्य+उपरि–(गुण स्वर सन्धि)। वृहदाकाराः–वृहत्+अकाराः–(व्यञ्जन सन्धि)। पुरेतिहास्य–पुरा+इतिहासस्य–(गुण स्वर सन्धि)। रामगिरिरिति–रामगिरिः+इति (विसर्ग सन्धि)।

### प्रत्यय

**1–तद्धित**

ऐतिहासिक–इतिहास+ठक्+इक (सम्बन्धी तद्धित प्रत्यय)। अन्यतम–अन्य+तमप् (अतिशय बोधक तद्धित प्रत्यय)। प्राचीनतमा–प्राचीन+तमप् (अतिशय बोधक तद्धित प्रत्यय)।

**2–कृदन्त**

निवसन्–नि+वस्+शतृ (अत्) (वर्तमानकालिक कृदन्त)। अनु–सम्+धा+ल्युट् (अन)–अनुसन्धानम्।

### समास

सीताकुण्डम्–सीतायाः कुण्डम् षष्ठीतत्पुरूष। स्निग्धच्छाया–स्निग्धा छाया (कर्मधारय)। नाट्यशाला–नाट्यस्यशाला (तत्पुरूष समास)। अनन्यः–न अन्यः (नञ् तत्पुरूष समास)।

## अभ्यासप्रश्नाः

**(1) निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए–**

(क) सरगुजामण्डलं कुत्र स्थितम् अस्ति ?
(ख) रामगिरिः कस्मिन् मण्डले स्थितः अस्ति ?
(ग) शीतलं जलकुण्डं किं कथ्यते ?
(घ) कां गुहां प्राचीनतमा नाट्यशाला मन्यन्ते ?
(ङ) पर्वतस्य उपरि किम् अस्ति ?

**(2) सन्धि विच्छेद कर प्रकार लिखिए–**

भूभागोऽयम्, इत्येतानि, वृहदाकाराः, पुरेतिहासस्य, रामगिरिरिति।

**(3) नीचे लिखे विग्रहयुक्त पदों के सामासिक पद बनाईये।**

वनवासस्य काले
सीतायाः कुण्डम्
स्निग्धा छाया
नाट्यस्य शाला
विशिष्टं महत्त्वम्

**(4) नीचे लिखे वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) मैं छत्तीसगढ़ प्रदेश में रहता हूँ।
(ख) पर्वत से झरना निकलता है।
(ग) राम ने यहाँ पर कुछ समय तक निवास किया था।
(घ) छत्तीसगढ़ में 36 गढ़ थे।
(ङ) मुझे संस्कृत भाषा अच्छी लगती है।

**(5) निम्नलिखित पदों में से उपयुक्त पद रिक्त स्थान में लिखिए–**

''प्राचीनतमा, कञ्चित्कालम्, मुकुटमिव, अनन्यः, पालिभाषायाम्''

1. उत्तरस्यां दिशि ............... सरगुजा मण्डलं स्थितमस्ति।
2. सीतावेंगरा गुहा ............... नाट्यशाला अस्ति।
3. अस्यां ................ एकः शिलालेखः उत्कीर्णः।
4. अत्र श्रीरामः वनवासकाले ................... न्यवसत्।
5. ............. अयं रामगिरिः।

**1. इन्हें हम यह भी कह सकते हैं –**

1. गिरिः, सानुः, ......................।
2. रामः, राघवः .......................।

3. सीता, जानकी ..................... ।
4. जलम्, नीरम् ...................... ।

## 2. विरूद्धार्थी शब्द लिखिए

1. शीतलम् ............................ ।
2. दिनम् ................................ ।
3. नरः .................................. ।

## 3. युगल पद – (सामासिक पद बनावें)

1. सीता–रामः ........................ ।
2. माता–पिता ........................ ।
3. बालिका–बालकः .................. ।
4. पत्रम्–पुष्पम् ........................ ।
5. देवः – दानवः .................... ।

## 4. पद प्रहेलिका – (पद पूर्ण करें)

| | | | | |
|---|---|---|---|---|
| शि | ला | | | म् |
| | ची | न | त | मा |
| में | घ | | | म् |

| | | | |
|---|---|---|---|
| गो | | का | र |
| दे | | दा | सी |
| | रं | गि | का |

## 5. अर्थ प्रहेलिका – (हिन्दी में अर्थ लिखिए)

1. नाट्यशाला .......................... ।
2. अवशेषाः .............................. ।
3. दुर्गः ................................... ।

QJYSDH